National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(61): 91-95
© 2025 NJHSR
www.sanskritarticle.com

**मानु-दासः**
गवेषिका,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः, अन्ध्रप्रदेशः, भारतवर्षम्

**Correspondence:**
**मानु-दासः**
गवेषिका,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः, अन्ध्रप्रदेशः, भारतवर्षम्

# सार्ववर्णिकमनोरञ्जनसाधनं नाटकम्

**मानु-दासः**

**प्रबन्धसंक्षेपः-** मोक्षप्राप्तिः मानवजीवनस्य मूलम्। मोक्षप्राप्तिः इत्युक्ते परमात्मना सह मेलनम्। काव्यकात्त्विकाः वदन्ति, काव्यपाठे ब्रह्मस्वादसहोदरानन्दस्य प्राप्तिः भवति। अतः काव्यपाठेनैव मोक्षप्राप्तिः भवत्येव। काव्येषु नाटकं रम्यमासीत्। नाटके दृश्यं श्रव्यं च वर्तेते। तदर्थं तद् नाट्यम् सुखदायकम् आनन्ददायकं भवति। नाट्यस्य नामान्तरम् अस्ति नाटकम्, दृश्यकाव्यम्, रूपकं चेत्यादि। आभानकानुसारं प्राचीने काले भरतमुनिना सर्वजनसुखाय पञ्चमवेदरूपं नाट्यवेदं सृष्टवान्। तत्र नाटकस्य माहात्म्यम् उद्घोषितम् भरतेन। अस्मिन् शोधप्रबन्धे नाटकस्य महिमावर्णनाकाले तद् कथितं तदेव *सार्ववर्णिकमनोरञ्जनसाधनं नाटकम्* इति शीर्षके आलोचितमस्तीति।
**कुञ्चिकाशब्दाः-** नाट्योत्पत्तिः, नाटकनिर्माणप्रक्रिया, नाटकम्, काव्यस्य रसोपलब्धिः, काव्यस्य तन्मीभवनम्, नॉटकस्य माहात्म्यम्

**मूलप्रबन्धः**

❖ **उपोद्घातः**

"प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते" इत्याभानकमुद्दिश्य प्रयोजनमूलैव सर्वेषामुद्योगः। सैव प्रवृत्तिर्नाट्यकाव्ययोरदुर्लभा। काव्यादेरध्ययनस्य तु प्रयोजनं किं जिज्ञासितश्चेद् रसास्वाद आनन्दानुभूतिर्वा तत्प्रयोजनम्। तथाहि मम्मटाचार्येमण काव्यप्रकासस्य प्रथमे उल्लासे काव्यप्रजनविचारावसारे 'सद्य परनिवृतये'[1] इत्यस्य कारिकाविशेषांशस्य व्यख्यायां वृत्तावुच्यते- "सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादसमुद्भूतं विगलितवेद्यान्तरमानन्दम्।"[2] इति। काव्यन्तु सुललितभाषानिबद्धत्वान् मनोभावाभिव्यञ्जकत्वादलंकरत्वाद् रसप्रवाहपरीतत्वाद् माधुर्यप्रसादादि-गुणसमन्वितत्वात् कलात्मकत्वाच्च सर्वेषामपि सुधियां चेतांसि आवर्जयति। विविधकलाप्रख्यपनाद् रूचिरगूणालंकारत्वाद्विद्वान् मनोहरत्वाच्च "कलासीमा काव्यम्"[3] इत्युद्घोष्यते सादरम्। यादृशी कल्पनमूला चेतःप्रसादिनी रूचिरा भावाभिव्याक्तिरूपलभ्यते काव्येऽस्मिन्नेव, न खलु तथान्यत्र। तदा प्रख्यतटीकाकारेण मल्लिनाथेन समुदीरितम्- 'माघे मेघे गतं वयः'इति। तत्र स्वानुभूते र्विविधशास्त्रवगाहिज्ञानस्य प्रकाशेन च सहृदयानां सर्वाङ्गीनत्वं जीवनोद्देशस्य साफल्यञ्च।

• **काव्यभेदाः**

संस्कृतकाव्यसाहित्यस्य भेदद्वयं विद्यते खलु श्रव्यकाव्यं दृश्नकाव्यञ्च। यथा हि "दृश्यश्रव्यत्वभेदेन पुनः काव्य द्विधा मतम्"[4] इति। श्रव्यकाव्यं पठनीयं श्रवनीयं च भवति। तच्च महाकाव्य-गीतिकाव्य-चम्पूकाव्यदिभेदेन बहुविधम्। परञ्च दृश्यकाव्यं युगपत् श्रोत्रनेत्रानां चमत्कारित्वं विधत्ते। पुनः दृश्यकाव्यं द्विधा भिद्यते रुपकोपरुकभेदेन। पुनश्च रुपकन्दशविधमिति। यथा साहित्यदर्पने–

**नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः।**
**ईहामृगाङ्कवीथ्यः प्रहसनमिति रुपकानि दशः॥**[5] इति

उपरुपकमप्यष्टादशप्रकारा उपलभ्यन्ते साहित्यदर्पने–

**"नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्।**

**प्रस्थानोल्लाप्यकाव्यनि प्रेङ्खणं रासकं तथा॥**
**संलापकं श्रीदजितं शिल्पकञ्च विलासिका।**
**दुर्म्मलिका प्रकरणी हल्लीशोभानिकेति च॥**
**अष्टादश प्राहूरुपकानि मनीषिणः।**
**विनाविशेषं सर्वेषां लक्ष्मनाटकन्मतम्॥"**[6] इति

अतोऽष्टात्रिंशद्दृश्यकाव्यमुपरुपक-रुपकभेदसहेत। तेष्वन्यतमं नाटकमिति।

- **नाटकम्**

नटस्य कर्म भावो वा इत्यनेन नटशव्दाद् 'गुणवचनव्राह्मणादिभ्य कर्मणि च'[7] इत्यनेन सूत्रेन कर्मे भावे वा ष्यञ् प्रत्ययेन निष्पन्नोऽयं नाट्यशव्दः, 'अतोऽम्'[8] इति सूत्रेण नपुंसके अमागमे नाटकमिति सिद्ध्यति। साधारणदृष्ट्या नाट्यं नाटकं दृश्यकाव्यं रुपकं रुपञ्च पर्यवाचपदानि। अतः प्रश्नो नाट्यं किमिदम्? उत्तरम् अवस्थाया अनुकृतिरनुकरणं वा नाट्यम्– 'अवस्थानुकृतिर्नाट्यम्'[9] इति। प्रयोगोऽपि दृश्यते यथा भरतस्य नाट्यशास्त्रमपि चालङ्कारिकस्य रामचन्दगुनचन्द्रस्य नाट्यप्रदीपः। अस्य रुपसंङ्गा अपि भवति। चक्षुरिन्दियग्राह्यविषयो हि रुपम्। नाट्यमप्यभिनयेन चक्षुरिन्दियग्राह्यतामवाप्नोति। तदा नाट्यदृश्यमानतया रुपमित्युच्यते। तदुक्तं दशरुपके धनञ्जयेन 'अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते'[10] इति।

नाट्यस्य नामान्तरं तावद्रुपकमिति। कस्मिंश्चिदपि वस्तुन्यपरवस्तनोऽवस्थारोपे रुपकमित्यच्यते। तन्निगदितं दशरुपके 'रुपकं तत्-समारोपात्'[11] इति। साहित्यदर्पने च 'तद्रुपारोपात्तुरुपकम्'[12] इति। अत्र नटादौ रामादिस्वरिपारोपो भवति तदेवं नामकरणम्। प्रयोगो यथा धनञ्जयस्य दशरुपकमिति।

रुपकनाम्नालंकारे प्रधानत उपमेयपदार्थे सादृस्यवशात् चन्दादेरुपमानस्यारोपो भवति, तथैव नाट्येऽपि नटादौ रामादिनाटकीयपात्रानामवस्थारोपो भवति। एतस्मादेव दृश्यकाव्यं नाट्यम्वा रुपकं नाम्नापि कथ्यते। तथाहि भणितं विद्वद्भिः–

**"यथा मुखाद्यैपद्मादेरारोपो रुपकं मतम्।**
**तथैव मायकारोपो नटे रुपकमुच्यते॥'** इति

एवञ्च नाट्यं दृश्यतया दृश्यकाव्यमित्युच्यते। यत्रोच्यते प्रथमे उद्यते धनञ्जयेन– 'दृश्यं तत्राभिनेयम्'[13] इति। अस्य नामान्तरम् अभिनयश्च, यथा नाट्शास्त्रे 'यस्मात् प्रयोगं नयति तस्मादभिनयः स्मृतः'[14] इति।

अपि च दृश्यकाव्यं नाटकमिति संज्ञया अभिधीयते। प्रयोग यथा सागरनन्द्यालङ्कारिकस्य नाटकलक्षणरत्नकोशः नाम अलङ्कारग्रन्थः अपि च रुपगोष्वामिकृतो नाटकचन्द्रिका इति। यद्यपि नाटकं दृश्यकाव्यस्य अवान्तरविभागस्तथापि 'प्राधान्येन व्यपदेशा भवन्तीति' नयेन दृश्यकाव्यं नाटकमित्यभिधीयते।

अतो नाट्यरुपरुपकदृश्यकाव्यनाटकानां मध्ये नास्ति कश्चित्-परमार्थतो भेद इत्यत्र नास्ति काचिद्विप्रतिपत्तिरिति।

'वस्तु-नेता-रसस्तेषां भेदकः'[15] इति धनञ्जयवचनानुसारेण नाटके तत्त्वत्रयं प्राधान्यं भजते। नाटके रसस्य महत्त्वमुररीक्रियते। रसनिष्पत्तिः इथम् आनन्दानुभवाथञ्च नाटकरचन-कर्मणि कवीनां प्रवृत्तिर्भवति।

- **नाट्योत्पत्तिः**

नाट्योत्पत्तिविषये एका काहिनि विद्यते शारदातनयविरचितः भावप्रकाशे ग्रन्थे। यथा-

**कल्पस्यान्ते कदाचित्तु दग्ध्वा लोकान् महेश्वरः।**
**स्वे महिम्ति स्थितिः स्वैरं नृत्यन्ननन्द निर्भरम्॥**
**मनसैवासृजद्विष्णुं व्रह्माणञ्च महेश्वरः।**
**मियोगाद्देवदावस्य व्रह्मा लोकानथासृजत्॥**
**दृष्ट्वा स देवदेवेस्य पुरावृत्तमथास्मरत्।**
**दिव्यं चारित्रमैशं मे कथमध्यक्षतामियात् ॥**
**इति चिन्तापरे तस्मिन्नभ्यगान्नन्दिकेश्वरः।**
**स नाट्यवेदमध्याप्य सप्रयोगं चतुर्मुखम्॥**
**उवाच वाक्यं भगवान् नन्दी तच्चिन्तार्थवित्।**
**नाट्यवेदोपदिष्टानि रूकानि च यानि तु॥**
**विधाय तेषामेकं तु रूपकं लक्षणान्वितम्।**
**भरतेषु प्रयोज्यं तत् त्वया सम्यग् विजानता॥**
**.........................शृङ्गाराद्या विनिर्गताः॥** इत्यादि

भरतनाट्यशास्त्रे अपि भरतेन भिन्ना कथा उपस्थापिता। सर्वजनमनोरञ्जनाय कवयो नाट्यमिदं विरचयन्ति। यस्य निर्मानं सर्वजनहिताय सर्वजनसुखाय च भवति। यतो हि देवसमाजहितचिन्तनेच्छया व्रह्मणा नाटकस्यास्य सृष्टिः कृता। पुरा देवैः व्रह्मा प्रार्थितं यत् दृश्यश्रव्यमयं तावत् क्रीड़मीयकमिच्छामः। कथितञ्च भरतेन नाट्यशास्त्रे-

**महेन्दप्रमुखैर्देवैरुक्त किल पितामहः।**
**क्रीड़मीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेत्॥**
**न वेद व्यवहारोऽयं संश्राव्यः शूद्रजातिषु।**
**तस्मात् सृजापरं वेदं पञ्चमं सार्ववर्णकम्॥**[16] इति

तैरित्थं प्रार्थितो विधाता ऋग्वेदात् पाठ्यं सामवेदाद् गीतं यजुर्वेदादभिनयमथर्ववेदाच्च रसानादाय सर्वशास्त्रार्तसम्पन्नं नाट्यवेदं ससर्ज।

यदुक्तं भरतमुनिना नाट्यशास्त्रे-

**जग्राह पाठ्यमृग्वेदात् सामेभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसानथर्वनादपि॥**
**वेदोपवेदैः संबद्धो नाट्यवेदो महात्मना।**
**एवं भगवता सृष्टो व्रह्मणा सर्ववेदिना॥**[17] इति

वेदचतुष्टयेन व्रह्मणक्षत्रियवैश्यानां त्रयानां वर्णानां हितसाधनं भवति, परञ्च सार्वनिकपञ्चमवेदेन नाट्येन सर्वेषां मनोरञ्जनं हितसाधनञ्च। नाट्येन सर्वेसां वर्णानां जना आनन्दानुभितिः भवति, यतो हि दर्शनीयात् हृद्यं श्रवनीयादुपदेशजनकञ्च भवति। एवं सहृदयानां हृदये आनन्दानुभूतिमुत्पादयति नाटकम्। तथा च कान्तासम्मितोपदेशं करोति- "दृश्यं हृद्यं श्रव्यं व्युत्पत्तिप्रदामिति-

प्रीतिव्युत्पतिप्रदम्” इत्युक्तम् अभिनवभारत्यां नाट्यशास्त्रस्य प्रथमाध्यायामभिनवगुप्तेन। तदिदं नाट्यवेदम् अतिप्राचीनकालाद् आर्तजनान् सान्त्वयन् रसिकमनांसि रञ्जयनपथि पदन्निदधातो जनान् सुमार्गे प्रवर्तयन्नास्ते।

वस्तुतस्तु नाट्यशास्त्राचार्यैर्नाट्यं सार्वजनिकमनोरञ्जनस्य साधनत्वे-नाङ्गीकृतम्

- **नाटकनिर्माणप्रक्रीया**

धीरोदात्त-धीरोद्धत-धीरोललित-धीरोप्रशान्तप्रमुखानां नायकानां या विविधा अवस्थास्तासामनुकरणं रसनिष्पत्तौ आङ्गिक-वाचिक-सात्त्विकाहार्यैः चतुर्विधाभिनयैर्नटानां व्यापारो नाट्यं नाटकम्वा चिह्नितम्। नाट्ये संगीत-नृत्य-चित्र-मुर्ति-वस्तुप्रभितिनां ललित-कलानां सिल्पकलानाञ्च समागमो भवति। कुत्रचित् नटनटिनां नेपथ्यं प्रसाधनं रसिकानां नेत्रानि कर्षति, क्वचित्तु तौर्यत्रिकसमेतं सङ्गीतकं श्रवनानि तर्पयति।

एवं नाटकस्य गटनप्रक्रियावर्णनावसारे आलङ्कारिकेन विश्वनाथेन पूर्ववर्तिनाम् आलङ्कारिकानां स्मृत्वा साहित्यदर्पणे षष्ठे अध्याये निगदितम्–

**नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्।**
**विलासद्ध्यादिगुवदयुक्तं नानाविभुतिभिः॥**
**सुखदुःखसमद्भूति नानारसनिरन्तरम्।**
**पञ्चदिका दसपरास्ताङ्का परिकीर्तिताः॥**
**प्रख्यातवंशो राजर्षिधीरोदात्तः प्रतापवान्।**
**दिव्योऽथ दिव्यादिव्यो वा गुणवान नायको मतः॥**
**एको एव भवेदङ्गी शृङ्गारो एव वा।**
**अङ्गमन्ये रसाः सर्वे कार्य्यं निर्व्वहणेऽद्भुतम्॥**
**चत्वारः पञ्च वा मुख्याः कार्य्याव्यापृतपुरुषाः।**
**गोपुच्छाग्रसमाग्रन्तु वम्धमं तस्य कीर्तितम्॥**[18] इति

एतानि वैशिष्ट्यानि नाटकरचनावसारे प्रायः सम्पादनीयानि कविभिः। कचिद्वा एतेषां विपर्ययो दृश्यते। एतामि न खलु नाटके अपि तु सर्वेषु दृश्यकाव्यभेदेषु प्रयोक्तव्यानि।

- **नाटकस्य व्यापकत्वं सर्वाङ्गीणत्वञ्च**

नाटके सर्वलोकानां भावानां दर्शनं भवति। जगति ज्ञानशिल्प-विद्या-कला-योग-कर्मादयस्तस्मिन् सन्निहिताः। यदुक्तं नाट्यशास्त्रे भरतेन–

**त्रैलोकस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्॥**[19] इति

अपि च

**न तज्-ज्ञानं न तच्छिल्पं न सा विद्य न सा कला।**
**न स योगो न तत् कर्म नाट्येऽस्मिन् यन्न दृश्यते॥**
**सर्वशास्त्रानि शिल्पानि कर्माणि विविधानि च।**
**अस्मिन् नाट्ये समेतानि तस्मादेतन्मया कृतम्॥**[20] इति

नाटके प्राणिमात्रस्य नानाभावानाम् अवस्थानां चित्रणं वर्तते, वस्तुतस्तु नाट्यं लोकाचरनस्यानुकरणं भवति। एतद् दुःखार्तानां श्रमार्तानां शोकार्तानां सर्वेषाणां कृते विश्रान्तिजनकं हितकार-मुपदेशप्रदञ्च–

**विश्रान्तिजननं लोके नाट्यमेतद् भविष्यति।**
**विनोदजननं लोके नाट्यमेतद् भविष्यति॥**[21] इति

- **सत्यं शिवं सुन्दरञ्च नाटकम्**

नाटके सत्यशिवसौन्दर्यानां प्रदर्शनं भवति।तस्मिन् सर्वेषामवस्थानां चित्रणम्भवति। हितोपदेशप्रदानात् नाटकं शिवं विश्रान्तिजनकत्वात् सम्रेलनं नाटके एव भवति।

- **रसोपलब्धेः सुसाधनम्**

सहृदयानां मनसि ह्लादकारकरसानुभूत्युत्पादनमेव काव्यस्यपदेशो भवति। रसानुभुतेःमूलकारणं रतिहासादिस्थायिभावस्य विभावानुभा-वव्याभिचारिभावैः सह संयोगं विद्यते- ‘विभावानुभावव्याभिचारि-संयोगात् रसनिष्पत्तिः’[22] इति। नटानामभिनयेन नाट्यप्रयोगकाले विभावानुभवव्याभिचारिणो भावाः प्रकासिता भवन्ति। नाट्याभि-नयप्रेक्षको विगलितपरिमितभावो वेद्यान्तररससम्पर्कशून्यः सहृदय-संवादभाक् सन् रसास्वादनं करोति।

रङ्गे समुपस्थितानां पात्र्रानां वेशाकारसंलापादिभिः प्रेक्षकानां मनसि आनन्दवारिधिः उल्लसते। येन भावकजनानां रसोपलब्धिमार्गं निर्वाधमेव। अनयैव दृष्ट्या ‘नाटकान्तं कवित्वम्’ इत्युक्तम्। वस्तुतस्तु काव्यस्य सहृदयस्य च चरमलक्ष्यं नाट्येन प्राप्यते।

- **काव्यस्य तन्मयीभवनम्**

नाट्ये येषामपेक्षा वर्तते ते खलु नाट्यकाराभिनेतृसामाजिकादयो भवन्ति। काव्यनाटकयोः वैशादृश्यं प्रतिपादयता साहित्यसमालोचकेन मतिलालमजुमदारमहोदयेन स्वकीये निबन्धे सुष्टूक्तम्- “एइ खानेइ (दृश्यकाव्येर क्षेत्रे) कविकेओ मानुष्यसाधरणेर सङ्गे एकासने वसिते हय- व्याक्तिमानसेर उत्कृष्ट भाव, उत्कृष्ट चिन्ता वा ऋषिसुलभ दिव्यदृष्टिर अभिमान त्याग करिते हय, शिप्लकलार साधारणीकरण यदि कोथाओ थाके तवे से एखानेइ।ये नाटक रङ्गालये दृश्यरुपे बहुजनेर चित्त हरण करिते पारे ना ,ताहा नाटकइ नय।”[23] इति।

यन्नाटकं रङ्गमञ्चे सहृदयहरणेनालम्, तन्नैव नाटकपदवाच्यं भवति।अत्रैव नाटके साहितस्य शिल्पकलाया वा साधारणीकरणं भवतीति मोहितमतिः।

- **नाटकस्य माहात्म्यम्**

रसोपलब्धेः एव कविकर्मणो जेष्ट्यं श्रेष्ठ्यञ्च सार्थक्यमित्या-लङ्कारिकानां सुनिश्चितः समयः। नाटके तद् रसोपलब्धिरभिनयद्वारेण अव भवति। श्रव्यकाव्यस्य रसोपलब्धिः खलु केवलं पठनेनैव भवति। तथा चोक्तं व्याख्याकारेण भट्टतौतेन-‘प्रयोगत्वमनापन्ने काव्ये नास्वादसम्भवः’ इति।

नाटके सर्वान् भवान् सुस्पष्टतया प्रत्यक्षीकर्तुं शक्यते। सर्वेऽपि रसास्तत्रैव निबद्धाः। यथास्थानमेव पुरुरषार्थचतुष्टयञ्चतुवर्गो वा गृह्यते। तदुदघोषितंनाट्यशास्त्रे भरतेन-

**क्वचिद् धर्मः क्वचिद् क्रिड़ा क्वचिदर्थः क्वचिच्छमः।**
**क्वचिद् हास्यं क्वचिद् युद्धं क्वचित् कामः क्वचिद् वधः॥**[24] इति

कविकुलगुरुणा कालिदासेन नाटकं विभिन्नरुचियुक्तानां जनानां कृते आनन्ददायकमद्वितीयं समाराधनं मन्यन्ते। एतदवलम्ब्य मालविका-ग्निमित्रे कालिदासेन भनितम्-

**"नाट्यं भिन्नरूचेर्जनस्य बहुधापेकं समाराधनम्"**[25] इति

नाटके लोकवृत्तमनुसृत्य नानाभावा विषयाश्चोपस्थाप्यन्ते।तथा चोक्तं भरतेन–

**नानाभावोपसम्पन्नं नानावस्थान्तरात्मकम्।**
**लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम् ॥**[26] इति

नाटके क्वचिदवैदिकीशिक्षा, क्वचिदैतिह्यं, क्वचिदाख्यानं, क्वचिदाचार-विचारशिक्षा, क्वचित् कर्तव्योद्बोधनञ्च समाविश्यते–

**वेदविद्योतिहासानाम् आख्यानपरिकल्पनम्।**
**विनोदकरणं लोके नाट्यमेतद् भविष्यति॥**
**श्रुतिस्मृतिसदाचारपरिशेषार्थ-कल्पनम्।**
**विनोदकरणं लोके नाट्यमेतद् भविष्यति॥**[27] इति

श्लोकेऽस्मिन् जीवनयात्रानिर्वाहार्थं विहितेषु विविधेप्रपञ्चेषु श्रान्ताः क्लान्ता जना मनोरञ्जनामकं किमपि अभिलषन्ति। रुचीनाम्वैचित्र्यात् केचन काव्यशास्त्रविनोदेन, केचन कथालापैरपरे गोष्ठिसंलापैरन्ये संगीतेन, नृत्येन, केचन पुनर्मल्लयुद्धपर्यटनजलविहारादिभिर्नोविनोदं लभन्ते। परं नाटकं तु नानारुचियुक्तानां जनानां मनोविनद-स्थानम्।स्वकाव्ये कालिदासेन कथ्यते–

**देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषं**
**रुद्रेनेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।**
**त्रैगुण्योद्धवमत्र लोकचरितं नानारसं दृश्यते**
**माट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समावाधनम्॥**[28] इति

न केवलमेतदेव, अपि तु सर्वेषामप्यभीष्टं साधयति नाटकम्। यस्य यदेवाभीष्टन्तस्य तत् प्राप्तिर्भवति।तद्यथा धर्मनिष्ठानां कृते धर्मचर्चा,विषयिनाङ्कृते विषयोपभोगोऽज्ञानिनां कृते ज्ञानोपदेशः, धनिनाङकृते विलासार्थमर्थोपार्जनादिकं सर्वमत्र सम्भवति। साधूक्तं भरतमुनिना–

**धर्मो धर्मप्रवृत्तिनां कामः कामोपसोविनाम्।**
**निग्रहो दुर्विनीतानां मत्तानां दमनक्रिया॥**
**क्लीबानां धाष्टर्यजननम् उत्साहः शुरमानिनाम्।**
**अवुधानां विबधश्च वैद्युष्यं विदुषामपि॥**
**ईश्वरानां विलासश्च स्थैर्यं दुखार्दितस्य च।**
**अर्थोपजीविमामर्थो धृतिरुद्विग्नचेतसाम्॥**[29] इति

भारतीयसंस्कृतिर्वेदमूला। नाट्यशास्त्रञ्च वेदमूलम्। वेदार्थविषया रसभावादिभिरान्विताः सन्तः सर्वजनोपभोग्यतया लोकवृत्तानु-करणात्मकेषुनाटकेषु स्भुटतामाप्नुवन्ति।

नाटकस्य महत्वमुद्घोषयता व्याख्यायते भरतमुनिना नाट्यशास्त्रे प्रथमाध्याये–

**दुःखार्तानां श्रोमार्तानांशोकार्तानां तपस्विनाम्।**
**विश्रान्तिदननं काले नाट्यमेतद् भविष्यति॥**
**धर्म्यं यशस्यमायुष्यं हितं वुद्धिविवर्धनम्।**
**लोपोपदेशजननं नाट्यमेतद् भविष्यति॥**[30] इति

बामनेननालङ्कारिकेन अपि काव्यभेदालोचनावसारे दशरुपक-प्रशस्तिः कृता काव्यालङ्कारसूत्रवृत्तिग्रन्थे–'सन्दर्भेषु दशरुपकं श्रेयः'[31] इति।

नाटकानां महत्वं स्फुटीकुर्वता पाश्चात्यसमालोचकेन केनचिदुद्घोष्यते – '................A nation is known by its own theater.' इति। नाट्येन बासनाभ्यो निस्कृतिरुपलभ्यते। प्रथमं भावानामुद्रेकस्तदनु तेषाम्विवेचनम्भवतीति पाश्चात्यनाट्यशास्त्रे विरेचनसिद्धान्तप्रवर्तक-एरिष्टटलमहाभागोऽभिप्रैति। प्राच्यभावनानुसारतो नाट्यरसास्वादनं भावकानामन्तकरणे रजस्तमसोनिगरणद्वारेण सत्त्वोद्रेकेनचानन्दानु-भुतिमुत्पादयति। इत्थं नाट्यं काव्यसंसारे ललामभूतं साहित्यविद्यायाः सर्वोत्कृष्टप्रतिमानमिति निश्चप्रचम्।

किञ्च बहुना कविप्रतिभायाः प्रकृतपाटवं परिदृश्यते नाट्यरचना-यामेव–'नाट्यं कविनां निकषां वदन्ति'[32] इति

- **श्रव्यकाव्याद् दृश्यकाव्यस्य श्रेष्टत्वम्**

o श्रव्यकाव्यस्य श्रवनेन पठनेन वा भावकानां रसानुभावो जायते। शव्दैरेवकेवलंमानसिकदशाया अभिव्याक्तिर्भवति। तत्र रसस्वादने अपरिमितं मतोहरत्वं नायाति। परञ्च दृश्यकाव्ये नटकृतैः प्रयगैर्वणनीयविषयः प्रत्यक्षतया प्रतिविम्वित्वमेति। अतो भावकाः कल्पनां विनैव तस्यास्वादसिन्धौ निमज्जन्ति।

o श्रव्यकाव्यमाध्यमेन सभ्यमानवा एव रसानुभुतिकरणायालम्, परञ्च नाट्येन सर्वसाधरणजना अपि तत्र समर्थाः। तस्माद्भरतेन सृष्टन्नाट्यं सर्वजनमनोरञ्जकतया काव्यसंसारे नृपायते।

o दृश्यकाव्ये प्रेक्षकजनानां नाट्यपात्रैः सार्धम्प्रत्यक्षो योगः सम्पद्यते।येन रसानुभूतिः प्रवला भवति। अन्यतः श्रव्यकाव्ये केवलं कविना सह पाठकानां श्रोतृणां वा संयोगो भवति इत्यतः तत्र तादृशो रसस्वादो न सम्भवति।

o यद्यपि श्रव्यदृश्यकाव्ययो र्मध्ये कान्तासम्मितोपदेशो विद्यते, परञ्च क्रीड़नीयकत्वाद् नाट्यं गुढ़प्रच्छन्न-कट्वौषधमिव चित्तं सत्मार्ग-प्रर्वतनाय प्रेरयति- 'इदमस्माकं गुढप्रच्छन्नकट्वौषधकल्पं चित्ताविक्षेप-मात्रफलम्' इति (अभिनव-भारती)

o दृश्यकाव्ये सङ्गीत-वाद्य-दृश्यविधानादयः काव्यत्मकप्रभाव-वर्धनकर्मणि सहायताः कुर्वन्ति।तस्य कथानकञ्च कथोपकथनमाश्रि-त्याग्रेसरिमं भवति, येन सहृदयानां चेतः तत्र लीनतामापद्येत। अपरञ्च श्रव्यकाव्यस्य कथानकं वर्णनेनाग्रेसरति, येन श्रोतृनां पाठकानाञ्च मनसि कौतूहलो न तथा सञ्जायते।

o दृश्यकाव्यं यद्यपि श्रोत्राभ्यां नेत्राभ्याञ्च ग्रहीतव्यम्भवति, परञ्च नाट्यप्रधनतया चक्षुरिन्द्रियग्याह्यविषयः, तथापि श्रव्यकाव्यन्तु श्रत्रेन्द्रियग्याह्यविषयः, अतो केवलमेव श्रोत्रेन्दियेन काव्यानन्दास्वादो ग्रहोनीयो भवति। केवलं श्रवनात् यच्चमत्-कारकारित्वमस्माभि र्लभ्यते श्रव्यकाव्यपाठेन दृश्यकाव्यस्याभिनयद्वारेण तदधिकं चमत्-कारित्व-माप्यते इति नास्त्यत्र संशयावकाशः।

o श्रव्यकाव्यं कल्पनाप्रधानं भवति, तत्र यदि लोकजीवनेन सह ऐकान्तिकसम्वन्धो न तथा वर्तते, तथापि नास्ति तादृशी कापि हानिः। किन्तु 'दृश्यं तत्राभिनेयम्'[33] इति विधानात् दृश्यकाव्ये वास्तवसंस्पर्शः सततं कविभिः सम्पादनीयः। अत्र कल्पनापेक्षया वास्तवधर्मसैव प्राध्यान्यमस्ति इत्यनेन श्रव्यकाव्याद् दृश्यकाव्यमुत्कर्षम् अवगाहते। सुष्टु तावद् भाषितं कपिलदेवद्विवेदिमहोदयेन–

**श्रव्यं सहृदयादं नाठ्यं धृश्यगुणेन्नतम्।**
**हृन्नेत्ररञ्जनात्-प्रेयो रसभावविबोधकृत्॥**[34] इति

❖ **उपसंहृतिः**

जीवनमिदं समविषात्मकं हर्षदुःख्याद्यनुभूतिप्रोधानं भवति। खिन्नचित्तानां दुःखार्तानां विनोदाय नाट्यमुत्कृष्टं साधनम्। नाट्यम्विषन्नस्य विषादपहम्, खिन्नस्य खेदाहरम्, आर्तस्यार्तिहरनम्, पिड़ितस्य मानसिकोपचारः, उत्पीड़ितस्य पीड़ाहरम्, उत्पथगतस्य सन्मार्गप्रवर्तकं, आशाहीनस्य उद्यमप्रदं तथा सर्वेषामुपकारकं भवति। श्रान्तचित्तानां विनोदोत्पत्तेः नान्यः साधीयान् पन्था नाट्यमृते। कानिचन नाट्यानि नाटकानि वा उपदेशप्रदानि, कानिचन शिक्षाप्रदानि, कानिचन स्वदेशभक्ति-भागवद्भक्ति-समाजसेवा-परोपकारादिभावसमन्वितानि चुपलभ्यन्ते।अतो नाट्यानि सर्वजन-हृद्यानि सर्वविधज्ञानप्रदानि सर्वजनमनतुष्टिविधायकानीति सत्यम्। एतेन उपसंहृयतेऽस्माभिः यत् नाट्यं सर्वकाव्यभेदेषु अधिकरसस्फुर्ति-सम्पादकतया सहृदयसामाजिकचित्ताह्लादजनकतया च श्रेष्ठत्वं भजते।तदुक्तं समालोचकैः– "काव्येषु नाटकं रम्यम्" इति शिवम्।

**ग्रन्थपञ्जी**


**आकरग्रन्थाः**

- *काव्यादर्शः*- सम्पा. श्रीमती चिन्मयी चट्टोपाध्याय, पश्चिमबङ्ग राज्य पुस्तक पर्षत्, कलकाता, 1995
- दशरूपकः- ड. सीतानाथ-आचार्यः ड. देवकुमार-दासः, संस्कृत-पुस्तक-भाण्डारः, 2012
- धनञ्जयः, *दशरूपकम्*- सम्पा. ड. सीतानाथ आचार्य ओ देवकुमार दास, संस्कृत पुस्तक भाण्डार, कलकाता, 2012
- नाट्यशास्त्रम्-मघुसुदन-शास्त्रिः,काशीहिन्दुविश्वविद्यलयः, वाराणसी, 1981
- *नाट्यशास्त्रम्* (प्रथमो भागः)- पारसनाथ द्विवेदी, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, 1992
- नाट्यशास्त्रम्(प्रथमो भागो)- ड. पारसनाथ-द्विवेदी, सम्पुर्णानन्द-संस्कृविश्वविद्यालयः, 1992
- *काव्यमीमांसा*- सम्पा. उदयचन्द्र वन्द्योपाध्याय ओ ड. अनीता वन्द्योपाध्याय, संस्कृत वुक डिपो, कलकाता, 2010
- *साहित्यदर्पणः* (सटिप्पण 'लक्ष्मी' व्याख्याविभूषितः)- सम्पा. आचार्यः कृष्णमोहनशास्त्री, चौखम्भा संस्कृत संस्थान, वाराणसी, 2018
- साहित्यदर्पणः (षष्ठपरिच्छेदः)- सम्पा. ड. उदयचन्द्र वन्द्योपाध्याय, संस्कृत वुक डिपो, कलिकाता, 2011

**गौणग्रन्थाः**

- वन्दोपाध्याय, धीरेन्द्रनाथ- *संस्कृत अलंकार शास्त्र तत्त्व ओ समीक्षा*, पश्चिमवङ्ग राज्य पुस्तक पर्षत्, कलकाता, 2012
- Chattopadhyay, Rita- *20th Century Sanskrit Literature: A Glimpse into Tradition and Innovation*- Sanskrit Sahitya Parishat & Sanskrit Pustak Bhandar, Kolkata.
- घोषाल, वनविहारी- *अर्वाचीन (आधुनिक) संस्कृत साहित्येर इतिहास : १८०१-२०१९* (काव्य, उपन्यास, छोटगल्प, नाटक, प्रबन्ध), जलपाइगुडि, 2021
- चट्टोपाध्याय, ड. ऋता- *आधुनिक संस्कृत साहित्य १९१०-२०१०, छोटगल्प ओ नाटक*, प्रग्रेसिभ पावलिशार्स, कलकाता, 2021
- त्रिपाठी, राधावल्लभ- *संस्कृतसाहित्य : बीसवीं शताब्दी,* राष्ट्रिय संस्कृत संस्थान, दिल्ली, 1999
- दाशः, नारायणः- *संस्कृतसाहित्ये पश्चिमबङ्गस्यावदानम्*, कथाभारती, कलिकाता, 2013
- मुखोपाध्याय, अञ्जलिका- *देशे विदेशे संस्कृत चर्च्चा*, संस्कृत पुस्तक भाण्डार, कलकाता, 2021
- सेनः, शुभ्रजित्- *भारतवर्षे आधुनिकसंस्कृतसाहित्यम् : विहङ्गम-दृष्ट्या परिशीलनम्* (Modern Sanskrit Literature in India : A Bird's eye view), संस्कृतपुस्तकभाण्डारः, कोलकाता, 2021


[1]काव्यप्रकोशः,प्रथमपरिच्छेदः/2

[2]काव्यप्रकोशः,प्रथमपरिच्छेदः2(वृत्तिः)

[3]निवन्धशतकम्,पत्रसंख्या-125

[4]साहित्यदर्पणः,6/1

[5]साहित्यदर्पणः,षष्ठपरिच्छेदः4

[6]साहित्यदर्पणः,षष्ठपरिच्छेदः/5

[7]पाणिनि सूत्रम्-5/1/124

[8]पाणिनि सूत्रम्-7/1/24

[9]दशरूपकः,प्रथमोद्यतः /7

[10] दशरूपकः,प्रथमोद्यतः /7

[11] दशरूपकः,प्रथमोद्यतः

[12] साहित्यदर्पणः,षष्ठपरिच्छेदः

[13] दशरूपकः,प्रथमोद्यतः

[14] नाट्यशास्त्रम्, 8/7

[15] दशरूपकः,1/111

[16] नाट्यशास्त्रम्,1/11,12

[17] नाट्यशास्त्रम्,1/17,18

[18] साहित्यदर्पनः,6/6,7

[19] नाट्यशास्त्रम्,1/106

[20] नाट्यशास्त्रम्,1/116,117

[21] नाट्यशास्त्रम्,प्रथमाध्यायः

[22] नाट्यशास्त्रम्,षष्ठाद्यायः

[23] दशरूपकः, देवकुमारदासः सीतानाथ-आचर्यश्च,भूनिका

[24] नाट्यशास्त्रम्,1/107

[25] मालविकाग्निमित्रम्,1/4

[26] नाट्यशास्त्रम्,1/111

[27] नाट्यशास्त्रम्,1/122,123

[28] मालविकाग्निमित्रम्,1/4

[29] नाट्यशास्त्रम्,1/101,110,111

[30] नाट्यशास्त्रम्,1/125,126

[31] काव्यलंकारसूत्रवृत्तिः, 1/3/30

[32] दशरूपकः,देवकुमारदासः सीतानाथ-आचर्यश्च,भूमिकांशे

[33] साहित्यदर्पणः/6/1

[34] निबन्धशतकम्,पत्रम्-125